CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

[illegible]

Coll. No. 357

Title Mayaparādha stotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 357 Subject: Stotra.

Title: Mayaparādha stotra.

Author: Śaṅkarāçārya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.8" Extent: 2 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks:

श्रीगणेशा
यनमः ॥१॥

श्रीगणेशाय

श्रीगणेशाय नमः ॥ आदौ कर्मप्रसंगात्कलयति कलुषं मात्रकुक्षौ स्थितं स्यात् तन्मूत्रामेध्यमध्ये क्वथ
यति नितरां जाठरो जातवेदः ॥ यद्यद्वात त्रदुःखं विषगति विषमं शक्यते केन वक्तुं क्षंतव्यो मे पराधः
शिवाशिव शिव शिव भो श्रीमहादेव शंभो ॥१॥ बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्यं चेंद्रियेभ्यो भवगुणजनिता जंतवो मां तुदंति ॥ नानारोगादिदुःखाद्रुदनपरवशः शंकरं
न स्मरामि क्षंतव्यो मे य०२ ॥ प्रौढोहं यौवनस्थो विषयविषधरैः पंचभिर्मर्मसंधौ दष्टो नष्टो वि
वेकः सुतधनयुवतिस्वादसौख्ये निषण्णः शैवे चिंताविहीनं मम हृदयमहो मानगर्वाधिरूढं क्षं
तव्यो०३ वार्द्धके चेंद्रियाणां विगतिगतिमतिश्चाधिदैवादितापैः पापैरोगैर्वियोगैर्वि
कलितवपुषपौढहीनं च दीनं ॥ मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षंतव्यो मे पराध०४ ॥ स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं पूजार्थं
वा कदाचित् वरतरकुसुमाखंडबिल्वीदलानि ॥ नानीता पद्ममाला सरसि विकसिता गं
धपुष्पैस्त्वदर्थं क्षंतव्यो०५ ॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिगुडसहितैः स्नापितं नैव लिंगं नो
लिप्तं चंदनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः धूपैः कर्पूरयुक्तैर्विविधरसयुतैर्नै
व भक्ष्योपहारैः क्षंतव्यो०६ ॥ नो शक्यं स्मार्तकर्म प्रतिपदगहने प्रत्यवायाकुलत्वात् श्रौते
वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे सुसारे ॥ ज्ञानेधर्मे विचारे श्रवणमननयोः को
निदिध्यासितव्यः क्षंतव्यो०७ ॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते ल
*क्षसंख्यैर्हुतवहवदने नार्पितं बीजमंत्रैः ॥ नो तप्तं गांगतीरे व्रतजपनियमैः रुद्रजाप्यैर्न वेदैः क्षंतव्यो०८

स्थित्वास्थानेसरोजेप्रणयमयमरुत्कुंभितेसूक्ष्ममार्गेशांतेशांतिप्रणीतेप्रकटितहृदयेज्योति
शांनंदसारे लिंगंसद्ब्रह्मरूपं सकलेसुरनतंनैवदृष्टिःकदाचित् क्षं० ९ ॥ नग्नोनिःसंगशुद्ध
स्त्रिगुणविरहितोध्वस्तमोहंधकारोनासाग्रेन्यस्तदृष्टिर्विविधकमयःस्वातनिष्टःकदाचित्
क्षं० उन्मन्यावस्थयात्वांविगतकलिमलंशंकरंनस्मरामि क्षं० १० ॥ चंद्रोद्भासितशेखरेस्मर
हरेगंगाधरेशंकरे सर्पैर्भूषितकंठकर्णविवरेनेत्रोत्थवैश्वानरे ॥ दंतित्वक्कृतसुंदरांबरधरेत्रैलो
क्यसारेहरेमोक्षार्थंकुरुचित्तवृत्तिरचलामन्यैस्तुकिंकर्मभिः ११ किंदानेनधनेनवाजिक
रीभिःप्राप्तेनराज्येनवाकिंकिंवापुत्रकलत्रमित्रपशुभिर्देहेनगेहेनकिं ॥ ज्ञात्वैतत्क्षणभंगु
रंसपदिरेत्याज्यंमनोदूरतःस्वात्मस्थंगुरुवाक्यतोभजभजश्रीपार्वतीवल्लभं १२ ॥ आयुर्नस्य
२ तिपश्यतांप्रतिदिनंयातिक्षयंयौवनंप्रत्यायांतिगताःपुनर्नदिवसाःकालोजगद्भक्षकः ल २
क्ष्मीस्तोयतरंगभंगचपलाविद्युच्चलंजीवितंतस्मात्त्वांशरणागतंशरणदंत्वंरक्षरक्षाधु
ना ॥ १३ ॥ इति श्रीशंकराचार्यविरचितंमयपराधस्तोत्रंसंपूर्णम् ॥ यादृशमितिज्ञायानमेदोषःशुभस्तुः

१८मी